UG/CBCS/B.A./Hons./1st Sem./Sanskrit/SANCC2/2023

'समानो मन्त्रः समितिः समानी'

# UNIVERSITY OF NORTH BENGAL

B.A. Honours 1st Semester Examination, 2023

## CC2-SANSKRIT (102)

Time Allotted: 2 Hours | Full Marks: 60

*The figures in the margin indicate full marks.*

Mainaguri College Library

### विभाग-क

1. ***कस्यचिदेकस्य*** प्रश्नस्य उत्तरं प्रदेयम् — 12×1 = 12

(क) कालिदासकृते रघुकाव्ये प्रथमसर्गे वर्णितां वशिष्ठाश्रमप्रकृतिं वर्णयत।

(ख) रघुवंशस्य प्रथमसर्गे वर्णितानां रघुवंशीयानां राज्ञां विवरणं प्रदेयम्।

2. संस्कृतभाषया देवनागरीलिप्या च ***एकस्य*** व्याख्यां लिखत — 6×1 = 6

(क) अथवा कृतवाग्द्वारे वंशेऽस्मिन् पूर्वसूरिभिः।
मणौ वज्रसमुत्कीर्णे सूत्रस्येवास्ति मे गतिः॥

(ख) ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्ययः।
गुणा गुणानुबन्धित्वात्तस्य सप्रसवा इव॥

3. वङ्गभाषया आङ्गलभाषया वा ***द्वयोः*** अनुवादं कुरुत — 3×2 = 6

(क) तं सन्तः श्रोतुमर्हन्ति सदसद्व्यक्तिहेतवः।
हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकापि वा॥

(ख) आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः।
आगमैः सदृशारम्भ आरम्भसदृशोदयः॥

(ग) तं वेधा विदधे नूनं महाभूतसमाधिना।
तथाहि सर्वे तस्यासन् परार्थैकफला गुणाः॥

4. संस्कृतभाषया देवनागरीलिप्या च ***द्वयोः*** संक्षिप्तोत्तरं लेखनीयम् — 3×2 = 6

(क) "संपद्-विनिमयेनोभौ दधतुर्भुवनद्वयम्"— अत्र 'उभौ' इति पदेन कौ बौद्धव्यौ ? तौ कथं संपदविनिमयम् अकुरुताम् ? भुवनद्वयं किम् ?

(ख) " स पिता पितरस्तासां केवलं जन्महेतवः"— कस्य विषये इयमुक्तिः ? सः केषां पिता ? उक्तेरस्याः तात्पर्यं व्याख्यात।

(ग) दिलीपस्य अपुत्रकत्वे किं कारणम् ? कश्च तस्य प्रतिकारोपायः ?

## विभाग-ख

5. संस्कृतभाषया देवनागरीलिप्या च ***एकस्य*** प्रश्नस्य उत्तरं लिखत — 12×1 = 12

(क) "तथापि वक्तुं व्यवसाययन्ति मां निरस्तनारीसमया दुराधयः"— कस्य कस्याः वा उक्तिरियम् ? 'दुराधयः' इति पदस्य कोऽर्थः ? वक्तुः दुराधीनां कारणानि सविशदम् आलोचयत।

(ख) 'भारवेरर्थगौरवम्'— इत्युक्तेः याथार्थ्यं किरातार्जुनीयम् इति महाकाव्यस्य प्रथमसर्गम् अनुसृत्य प्रतिपादयत।

6. संस्कृतभाषया देवनागरी लिप्या च ***एकस्य*** व्याख्यां लिखत — 6×1 = 6

(क) कृतप्रणामस्य महीं महीभुजे<br>
जितां सपत्नेन निवेदयिष्यतः।<br>
न विव्यथे तस्य मनो न हि प्रियं<br>
प्रवक्तुमिच्छन्ति मृषा हितैषिणः ॥

(ख) व्रजन्ति ते मूढधियः पराभवं<br>
भवन्ति मायाविषु ये न मायिनः।<br>
प्रविश्य हि घ्नन्ति शठास्तथाविधान्<br>
असंवृताङ्गान्निशिता इवेषवः ॥

7. देवनागरीलिप्या ***एकस्य*** श्लोकस्य पादपूरणं कुरुत — 6×1 = 6

(क) ----------------------<br>
------------------------ ।<br>
-----------------------<br>
वसूपमानस्य वसूनि मेदिनी ॥

(ख) कथाप्रसङ्गेन जनैरुदाहृता —<br>
------------------------ ।<br>
-----------------------<br>
------------------------ ॥

8. ***द्वयोः*** संक्षिप्तोत्तरं लिखत — 3×2 = 6

(क) 'किरातार्जुनीयम्' इति महाकाव्यस्य मूलं किम् ? तत्र कति सर्गाः ? प्रथमसर्गस्य नाम किम् ?

(ख) 'कृतारिषड्वर्गजयेन मानवीम्'— उक्तेरस्याः वक्ता कः ? कस्य विषये वक्तुः इयमुक्तिः ? कस्तावद् अरिषड्वर्गः ?

(ग) 'न बाधतेऽस्य त्रिगणः परस्परम्'— कस्य कस्याः वा उक्तिरियम् ? अत्र 'अस्य' इति पदेन कः बोद्धव्यः ? त्रिगणः कः ?

——×——

Maynaguri College Library